SMṚTI MATERIAL IN THE MAHĀBHĀRATA

—being a collection of verses which are important from the sociological point of view

VOL I (TEXT)

SURES CHANDRA BANERJI, M A, D PHIL
Secretary, Vangiya Saṃskṛta Śikṣā Pariṣat, Calcutta,
AND
Author of 'A Companion to Sanskrit Literature', 'Dharmasūtras—a study etc', 'Kālidāsa-kosa', 'Cultural Heritage of Kashmir', 'Sadukti-karnāmrta' (ed), 'Kṛṣi-parāsara' (ed), 'A Glossary of Smrti Literature,' 'An Introduction to Pāli Literature' etc etc

Published by the author at 77A, Golf Club Road, Calcutta-33
with the financial assistance of the Government of India

In Memoriam



Late Suresh Chandra Das Gupta, a dedicated teacher and a noble soul, who initiated the author to the A B C of Sanskrit with more than paternal care

CONTENTS

APPENDICES

ADDENDA

ERRATA

PREFACE

The first question that may pose itself before the reader at the outset is—what is the use of studying the ancient work, *Mahābharata*, in this age of science and technology ?

A close study of the epic reveals that this valuable work has not outlived its utility even after the lapse of several centuries from the date of its compilation in the final form Nor will it be devoid of usefulness so long as human society is separated by a line of demarcation from the world of animals This epic is a repository of wisdom which never dies The eternal verities, contained in it, will always be a beacon light amidst the darkness that at times seems to engulf the sons of *amrta*, for the time being obscuring the vision of truth

The vast sub-continent of India is multi-racial and polyglot It is inhabited by people of diverse religious persuasions, a variety of social outlooks and heterogeneous faiths There must be a cohesive force to instil into them a sense of unity and integrity The *Mahābharata* is a means of welding the diverse components into a compact whole The descendants of the Aryans, living in the vast stretch of land from the Himālaya to Kanyākumārı, from Kashmir to the remotest corner in the east, are bound by common cultural links These links are apt to be obscured by fissiparous and disintegrating elements in the political field and cultural domain The present-day race for material prosperity, even at the expense of our valuable heritage, is gradually making us oblivious of the age-old values laid down by our illustrious forbears The *Mahābharata*, If properly interpreted, will go a long way in resuscіating our society from the quagmire of degeneration into which it is being pushed partly by our struggle for existence, partly by our peculiar habit of aping the way of life of the western people and largely by our forgetfulness of the glorious past.

Now that India has cast off the shackles of bondage, it should be our duty to see that colonialism in another garb, viz scientific and technological, does not keep us in subjection Again, political freedom can be preserved only by the freedom of our mind from obsessions, prejudices and ignorance Ignorance of one s past in a land like India is bound to foster disintegration Max Muller rightly asserts that a people that could feel no pride in the past, in its history had lost the mainstay of its national character ' The compiler or compilers of this great epic might justifiably echo the bold sentiment of the author of the *Rāmayana* that it will continue to inspire the people so long as mountains and rivers will last in the world

The *Mahābharata* is like a huge tree with roots deeply struck into the soil of Indian culture This tree ramified in all directions, and has been laden with flowers spreading fragrance all around and with fruits tasted by the wise people through the ages Having sprung up from the Indian soil it has, in its turn, helped the conservation of the soil Itself the fruit of age-old, time-honoured and colourful legends tradition and wisdom of India, it moulded the individual social and national outlook of the people of this vast country Through ages it has been a medium of instruction to all classes of people from the lowest rung of the social ladder to the highest Reputed writers drew upon this precious storehouse, partly or wholly, for the themes of their composition, prose, poetical and dramatic Elements of philosophy and Purāna are not absent in it It is indeed great (*mahat*) and weighty (*bhāravat*)

In the study of Indian sociology, the *Mahabhārata* plays a noteworthy rôle We find in it quite a lot of information under the broad heads of Smrti literature, viz Ācāra, Prāyaścitta, Vyavahāra and Rājadharma Passages, common to the epic and Dharmasāstra, particularly the *Manu-smṛti*, catch the eye of the careful reader The Smrti digests of the different schools freely quote from the epic in the discussion of various topics The commentaries on Prācinasmṛti cite the authority of the *Mahabharata* on many points Thus the collection of the Smṛti material, contained in this epic, is a de-

sideratum Besides throwing a flood of light on the early Indian society through several centuries, such a collection will help us in checking the *Mahabhārata* quotations in later treatises P V Kane, in his monumental *History of Dharma-sāstra*, has *en passant* referred to the epic while tracing the evolution of particular social and religious rites and customs His references are naturally not exhaustive in a work dealing primarily with Smṛti literature Works, dealing with Indian sociology or some aspect of it, incidentally refer to the *Mahabhārata* In the Bengali work, entitled *Mahabhā rater Samaj*, Sukhamay Sastri bases his observations on this epic But, the verses, quoted by him, form only a part of the Smrti material contained in this epic All these facts point to the need for a collection of the passages of the epic dealing with various matters of Smrti Now that the critical edition, trying to ascertain the original *Mahābhārata* text as approximately as possible, has been completely published by Bhandarker Oriental Research Institute, Poona, this need is felt all the more keenly P V Kane and other writers, referring to this epic, had, at their disposal, only the vulgate text We are at present in a position to verify their references by comparing them with the relevant portions of the critical edition As regards the names of holy places, it should be added that the critical edition mentions some which are not found in the vulgate text In the names of certain *tīrthas*, there is divergence in orthography between the critical edition and the vulgate text

The reasons, set forth above, prompted the present compilation We have culled the passages of the *Mahabhārata* which have Smrtic matters as their content, and have arranged them topic-wise as a glance at the table of contents will show Under each topic, the verses have been arranged alphabetically

The topical division is generally in consonance with the sectional divisions found in the tables of contents of the standard editions of the *Manu smṛti* and the *Yājñavalkya-smṛti* In collecting the verses, we have noted the important *variae lectiones* given as footnotes We have left out the spurious

passages appended to the different volumes of the critical edition

To pick out the Smrti material from the huge epic is like gathering gems from the fathomless ocean We have therefore, mainly confined ourselves to the Parvans and chapters, indicated by P V Kane, in his *History of Dharmasāstra*, as containing such matters We have also included such verses, outside the reckoning of P V Kane as have come to our notice We reserve, for the future a collection of the additional verses, dealing with Smrti matters to be culled from the remaining portions of the epic

At the end of the collection, we have added four Appendices Appendix I deals with the holy places mentioned in the critical edition of the *Mahābharata* The next is a glossary of the technical and difficult words of the text The third Appendix sets forth the *Mahabharata* passages quoted in the principal Smrti digests, these passages have been, as far as possible, located in the critical edition This appendix is useful in several respects In the first place, it will reveal the nature and extent of the influence of the epic on later Smrti works Secondly, this compilation will serve as secondary testimonia to the future editors of the revised edition of the *Mahābharata* Thirdly, it will betray to what extent the Smrti writers were misled by the spurious matter masquerading as parts of the *Mahabhārata*

The appendix that follows shows the verses of this collection which resemble the verses of the *Maun-smṛti*

We have deliberately left out the *Harivamsa* which is generally considered to be a supplement of a later date

Our work on the *Mahabhārata* has been divided into two volumes The first volume is being presented here. The forthcoming volume will contain English translation of the verses compiled in this volume, and depict a picture of the society mirrored in this great epic

For the curious reader, a few words may be added about the commentaries on this great epic The major commentators are as follows Devabodha, Vimalabodha, Sarvajñanārāyana,

Arjunamisra, Nilakantha These names have been stated in the chronological order that has been determined by modern scholars All the other commentators, stated above respectfully cite Devabodha as an ancient authority The lower limit of Devabodha's date is sought to be placed at 1150 A D His commentary, the *Jñanadipikā* has been partially recovered Nilakantha's commentary, called *Bharata bhavadipa*, is the most popular one He is placed approximately at the end of the seventeenth century A D

We do not claim to have dealt with the subject in a manner which leaves no scope for improvement It is, however, humbly claimed that a beginning has been made in the sociological studies in the light of the text of the *critical edition of the Mahābharata*

Any suggestion for improvement will be welcome We shall deem our labours, spread over quite a few years, amply rewarded if this work goes some way in enlightening the reader about our society in hoary antiquity as mirrored in our national epic and in making him conscious of his glorious heritage

It is our most pleasant duty to thank the Ministry of Education and Social Welfare, Government of India, with whose financial assistance this book has been able to see the light

Despite our best efforts, some errors of print have crept into the book We have corrected, in tee errata only the very glaring mistakes

Calcutta ,
Diwali, 1971

S C Banerji

A ĀCĀRA

1. वर्णविवेके

साधारणकथा ।

1 अक्रोध सत्यवचन सविभाग क्षमा तथा ।
प्रजन स्वेषु दारेषु शौचमद्रोह एव च ॥
आर्जव भृत्यभरण नवैते सर्ववर्णिका ।शान्ति ६०।७-८ (क) ॥

2 अतो हि सर्ववर्णाना श्रद्धायज्ञो विधीयते ।
दैवत हि महच्छ्रद्धा पवित्र यजता च यत् ॥ शान्ति ६०।३९ ॥

3 अतो विशिष्टस्त्ववधर्मो गुरुदारप्रधर्षक ।
बाह्य वर्ण जनयति चातुर्वर्ण्यविगर्हितम् ॥ अनु ४८।९ ॥

4 अदान्तो ब्राह्मणोऽसाधुर्निस्तेजा क्षत्रियोऽधम ।
अदक्षो निन्द्यते वैश्य शूद्रश्च प्रतिकूलवान् ॥ सौप्तिक ३ २० ॥

5 अधार्याणि विशीर्णानि वसनानि द्विजातिभि ।
शूद्रायैव विधेयानि तस्य धर्मधन हि तत् ॥ शान्ति ६०।३३ ॥

6 अपारे यो भवेत्पारमप्लवे य प्लवो भवेत् ।
शूद्रो वा यदि वाप्यन्य सर्वथा मानमर्हति ॥ शान्ति ७९।३७ ॥

1 दम क्षमा for क्षमा तथा पौरम् for शौचम्, त एते for नवैते

2 हतो for अतो सवविद्याना for ०वर्णाना यच्छता for यजता

3 अधनो for अथमो चातुर्वर्ण्याद् for ० वर्ण्य

4 अदाक्ष्यो for अदक्षो निन्दितो for निन्द्यते शूद्रस्य for शूद्रश्च
प्रतिकूल्यवान् for प्रति०

5 देयानि for विधे धर्म्य for धम यत् for तत्

6 अपात्रे (अपारो) for अपारे पात्रम् for पारम् अस्त्वे for
अप्लवे हि for (अ) पि सर्वत्र for सर्वथा

7 अयाज्य क्षत्रियो व्रात्य सूत स्तोमक्रियापरम् ।
वैश्यो वैदेहक चापि मौद्गल्यमपवर्जितम् ।। अनु ४८।१० ।।

8 अवश्यभरणीयो हि वर्णाना शूद्र उच्यते ।। शान्ति ६०।३१ ।।

9 अस्वामिकस्य स्वामित्व यस्मिन् सप्रति लक्षयेत् ।
सवर्णस्त च पोषेत सवणस्तस्य जायते ।। अनु ४६।२१ ।।

10 अहिसा सत्यमक्रोधो वृत्तिदायानुपालनम् ।
भरण पुत्रदाराणा शौचमद्रोह एव च ।। शान्ति ६५।२० ।

11 उक्तस्त्रयाणा वर्णाना यज्ञास्त्रय्यैव भारत ।
स्वाहाकारनमस्कारौ मन्त्र शूद्रे विधीयते ।। शान्ति ६०।३६ ।।

12 कर्म शूद्रे कृषिर्वैश्ये दण्डनीतिश्च राजनि ।
ब्रह्मचर्य तपो मन्त्रा सत्य चापि द्विजातिषु ।। शान्ति ९२।४ ।।

13 कामभोगप्रियास्तीक्ष्णा क्रोधना प्रियसाहसा ।
त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजा क्षत्रता गता ।।
शान्ति १८१।११ ।।

14 क्षत्रभावादपगतो ब्राह्मणत्वमुपागत ।। उद्योग १०४।१८ ।।

7 अग्राया for अयाज्य य for यो स्तोत्र for स्तोय वर for पर वैश्य (वैश्यो) न कल्यम् for मौद्गल्यम् उप for अप

9 स्वास्विमिकस्य स्वामित्व (अस्वामिनश्च स्वामित्व, अस्वामिनि स्वामिकत्व, अस्वामिके स्वस्वामित्व) for अस्वा त्व सप्रवि for सप्रति लक्ष्यते (पद्यते) for लक्षयेत् यो वण पोषयेत्त च (यो वर्णस्त च पीषेत, सवणस्य च दीषेण, सवण स च पीषेत, सवण पुष्णीत) for सवण यते तद्वर्णम् for सवण

10 वृत्तिर् for वृत्ति पौत्राणा for दाराणा अक्रोध for अद्रोह

11 शूद्रो for शूद्रे

12 ततो for तपो सव for सत्य

13 रक्तास्ते for रक्ताङ्गास्ते

14 उपरतो for अपगतो गमत् for गत

15 गोषु वृत्ति समाधाय पीता कृष्युपजीविन ।
स्वधर्म नानुतिष्ठन्ति ते द्विजा वैश्यता गता ॥
शान्ति १८१।१२ ॥

16 चतुर्णामेव वर्णाना धर्मो नान्यस्य विद्यते ।
वर्णाना धर्महीनेषु सज्ञा नास्तीह कस्यचित् ॥ अनु ४८।३० ॥

17 चतुष्पात्सकलो धर्मो ब्राह्मणाना विधीयते ।
पादावकृष्टो राजन्ये तथा धर्मो विधीयते ॥ शान्ति ३६।२८ ॥

18 छत्र वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे ॥ शान्ति ६०।३२ ॥

19 तथा वैश्ये च शूद्रे च पाद पादो विधीयते ।
विद्यादेवविधेनैषा गुरुलाघवनिश्चयम् ॥ शान्ति ३६।२९ ॥

20 तस्मात्सर्वेषु वर्णेषु श्रद्धायज्ञो विधीयते ॥ शान्ति ६०।४३ ॥

21 तिर्यग्योन्या शूद्रतामभ्युपैति
शूद्रो वैश्यत्व क्षत्रियत्व च वैश्य ।
वृत्तश्लाघी क्षत्रियो ब्राह्मणत्व
स्वर्ग पुण्य ब्राह्मण साधुवृत्त ॥ अनु ११६।२३ ॥

22 त्यक्तो मातापितृभ्या य सवर्ण प्रतिपद्यते ।
तद्गोत्रवर्णतस्तस्य कुर्यात्सस्कारमच्युत ॥ अनु ४९।२४ ॥

15 कृच्छ्रोप for कृष्युप
16 वर्णेषु for वर्णाना सख्या for सज्ञा
17 तदा for तथा
18 पात्र for छत्र
19 कलो धर्मे for च शूद्रे च पाददोषो for पाद पादो
20 तत for तस्मात् यज्ञेषु for वर्णेषु for वर्णेषु
21 योन्या for योन्या अप्युपेयात् for अभ्युपैति वैश्य for वैश्यत्व शूद्र for वैश्य व्रतश्लाघी for वृत्त० स्वर्गे for स्वर्ग प्राप्तो for पुण्य
22 स for य स्व for सु, अथ त for तद्गोत्र बधुता for वर्णतस् कुर्युस् for कुर्यात् सस्तवम् for सस्कारम् अप्युत for अच्युत

23 दमेन शोभते विप्र क्षत्रियो विजयेन तु ।
धनेन वैश्य शूद्रस्तु नित्य दाक्ष्येण शोभते ।। शान्ति २८२।२१ ।।

24 दानेन तपसा यज्ञैरद्रोहेण दमेन च ।
ब्राह्मणप्रमुखा वर्णा क्षेममिच्छेयुरात्मन ।। शान्ति ७६।१४ ।।

25 द्विजानाममृत धर्मो ह्येकश्चैकवर्णिक ।
यज्ञाध्ययनदानानि त्रय साधारणा स्मृता ।।
आरण्यक १४६।३४ ।।

26 न विशेषोऽस्ति वर्णाना सर्व ब्राह्ममिद जगत् ।
ब्रह्मणा पूर्वसृष्ट हि कर्मभि वर्णता गतम् ।। शान्ति १८१।१० ।।

27 पिशाचा राक्षसा प्रेता बहुधा म्लेच्छजातय ।
प्रनष्टज्ञानविज्ञाना स्वच्छन्दाचारचेष्टिता ।।
शान्ति १८१।१८ ।।

27a ब्राह्मणाना सितो वर्ण क्षत्रियाणा तु लोहित ।
वैश्याना पीतको वर्ण शूद्राणामसितस्तथा ।। शान्ति १८१।५ ।।

28 ब्रह्मणो मुखत सृष्टो ब्राह्मणो राजसत्तम ।
बाहुभ्या क्षत्रिय सृष्ट ऊरुभ्या वैश्य उच्यते ।। शान्ति ७३।४ ।।

29 ब्राह्मणे दममव्यग्र क्षत्रिये तेज उत्तमम् ।
दाक्ष्य वैश्ये च शूद्रे च सर्ववर्णानुकूलताम् ।। सौप्तिक ३।१६ ।।

23 दानेन for दमेन दास्येन for दाक्ष्येण
24 बलेन for दमेन
25 परमो for अमृत तत्त्व for धर्मो
26 ब्राह्मणा for ब्रह्मणा
27 चेष्टिका for ता
28 एव च for उच्यते
29 ब्रह्मणे for ब्राह्मणे रूपमव्यग्र (वेदमव्यग्र, क्षममव्यग्र, वेदमग्र्य तु, वेदमत्यर्थ) for दममव्यग्र

30 मुखतोऽसृजद्ब्राह्मणान् बाहुभ्यां क्षत्रियास्तथा ।
वैश्याश्चाप्यूरतो राजन् शूद्रान् पद्भ्यां तथैव च ।।
भीष्म ६३।१५ ।।

31 मूलगोत्राणि चत्वारि समुत्पन्नानि पार्थिव ।
अंगिरा कश्यपश्चैव वशिष्ठो भृगुरेव च ।। शान्ति २८५।१७ ।।

32 यज्ञो मनीषया तात सर्ववर्णेषु भारत ।
नास्य यज्ञहनो देवा ईहन्ते नेतरे जना ।
तस्मात्सर्वेषु वर्णेषु श्रद्धायज्ञो विधीयते ।। शान्ति ६०।४३ ।।

33 यथा न सदृशी जातु ब्राह्मण्या क्षत्रिया भवेत् ।
क्षत्रियायास्तथा वैश्या न जातु सदृशी भवेत् ।। अनु ४७।३९ ।।

34 यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् ।
कल्प्या तस्य तु तेनाहुर्वृत्तिं धर्मविदो जना ।।
शान्ति ६०।३४ ।।

35 याजनाध्यापने चोभे ब्राह्मणानां प्रतिग्रह ।
पालनं क्षत्रियाणां वै वैश्यधर्मश्च पोषणम् ।।
आरण्यक १४९।३५ ।।

36 संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टय ।
देवानामपि ये देवा यद् ब्रूयुस्ते परं हि तत् ।
तस्माद्वर्णै सर्वयज्ञा संसृज्यन्ते न काम्यया ।। शान्ति ६०।४१ ।।

31 भारत for पार्थिव

32 वैश्रद्धया for मनीषया यज्ञेषु for वर्णेषु

33 जात्या for जातु at both places.

34 य च कंचिद् for यश्च कश्चिद् कल्पातेन for कल्प्या तस्य ब्रह्मविदो for धर्म

35 विप्रे for चोभे

36 संहृष्टा for संसृष्टा देवाय for ये देवा वर्णा for वर्णै सर्वधर्मै for ०यज्ञा न कामत for न काम्यया

37 सर्वथा सर्ववर्णैर्हि यष्टव्यमिति निश्चय ।
न हि यज्ञसम किंचित् त्रिषु लोकेषु विद्यते ।। शान्ति ६०।५१ ।।

38 स्वेषु दारेषु सतोष शौच नित्यानसूयता ।
आत्मज्ञान तितिक्षा च धर्मा साधारणा नृप ।।
शान्ति २८५।२४ ।।

39 हिसानृतप्रिया लुब्धा सर्वकर्मोपजीविन ।
कृष्णा शौचपरिभ्रष्टास्ते द्विजा शूद्रता गता ।।
शान्ति १८१।१३ ।।

38 शौर्य for शौच नित्यानुसूयिता for नित्या ता आत्मा ज्ञान for आत्मज्ञान साधारणो for ०णा स्मृता (स्मृता) for नृप धर्मं साधारणो (०णे) नृप (स्मृत, मत) for धर्मा नृप.
39 हिसारति (हिस्रनृत) for हिसानृत सेवा for सर्वं वणोप (कामोप) for कर्मोप

II. वर्णविवेके

ब्राह्मणवर्णो ब्राह्मणधर्माश्च।

1 अग्रो हि ब्राह्मण प्रोक्त सर्वस्यैवेह धर्मत ।।
शान्ति ७४।२९ ।।

2 अजोऽग्निर्वरुणो मेष सूर्योऽश्व पृथिवी विराट् ।
धेनुर्यज्ञश्च सोमश्च न विक्रेया कथचन ।। शान्ति ७९।६ ।।

3 अधीत्य चतुरो वेदान् द्विजो मोहसमन्वित ।
पतितात्प्रतिगृह्याथ खरयोनौ प्रजायते ।। अनु ११२।४० ।।

4 अधीयीत ब्राह्मणोऽथ यजेत
दद्यादियात्तीर्थमुख्यानि चैव ।
अध्यापयेद्याजयेच्चापि याज्यान्
प्रतिग्रहान् वा विदितान् प्रतीच्छेत् ।। उद्योग २९।२१ ।।

5 अनध्यायेषु ये विप्रा स्वाध्याय नैव कुर्वते ।
तपोनित्या सुतपसो दुर्गाण्यतितरन्ति ते ।। शान्ति १११।११ ।।

2 अजोश्चो, (अश्चोजो, अनोग्निर् ,अश्वो०) for अजोऽग्नि वरुणो for पृथिवी
3 परि for प्रति गृह्यार्थ for गृह्याथ
4 याजयीत, (यो जयेत, वै यजेत), यो यजेत for ऽथो यजेत प्रतिग्रह्य च वै for प्रतिग्रहान् वा उपेयात् for प्रतीच्छेत् ।
5. तपोनिष्ठा for ०नित्या सुमनस, (सुतपसे) for सुतपसो

6 अन्न पान च माल्य च वासास्याभरणानि च ।
ब्राह्मण्यैतानि देयानि भर्तु सा हि गरीयसी ।। अनु ४७।३४ ।।

7 अब्राह्मण तु मन्यन्ते शूद्रापुत्रमनैपुणात् ।
त्रिषु वर्णेषु जातो हि ब्राह्मणाद् ब्राह्मणो भवेत् ।।
अनु ४७।१७ ।।

8 अवशेषानि चान्यानि त्रीणि कर्माणि यानि तु ।
दानमध्ययन यज्ञो धर्मयुक्तानि तानि तु ।। आश्व ४५।२३ ।।

9 अश्वारोहा गजारोहा रथिनोऽथ पदातय ।
एते वैश्यसमा राजन् ब्राह्मणाना भवन्त्युत ।। शान्ति ७७।५ ।।

10 अहिसा सत्यवचन क्षमा चेति विनिश्चितम् ।
ब्राह्मणस्य परो धर्मो वेदाना धारणादपि ।। आदि ११।१४ ।।

11 अहिस्र सर्वभूताना मैत्रायणगतश्चरेत् ।
अविस्रम्भे न गन्तव्य विस्रम्भे धारयेन्मन ।।
शान्ति १८२।१२ ।।

12 अहेरिव गणाद्भीत सौहित्यान्नरकादिव ।
कुणपादिव च स्त्रीभ्यस्त देवा ब्राह्मण विदु ।।
शान्ति २३७।१३ ।।

6 मेध्य for माल्य ब्राह्मण्यास् for ०ण्यै भर्त्रे (भर्त्रा) for भर्तु
7 मान्यन्ते for मन्यन्ते अनैपुणे for ०णात् जातेषु for जातो हि.
8 अथ शेषाणि (अविशेषाणि) for अवशेषाणि यानि for तानि
9 रथारोहा for अश्वा० अरथिनो, (रथिना) for रथिनो ऽपि for ऽथ त च, हते for एते
11 अक्रोध for अहिस्र –गति (गति) for गतश् भवेत् for चरेत्
12 यो हरीव for अहेरिव गुणाद्, (जनाद्) for गणाद् भीता for भीत सुहृदो (सौहित्य) for ०त्यान् राक्षसीभ्य इव for कु .च

13 आनन्द प्रीतिरुद्रेक प्राकाश्य सुखमेव च ।
अकार्पण्यमसरम्भ सतोष श्रद्धधानता ।। आश्व ३८।२ ।।

14 आह्वायका देवलका नक्षत्रग्रामयाजका ।
एते ब्राह्मणचण्डाला महापथिकपञ्चमा ।। शान्ति ७७।८ ।।

14a इत्येतै कर्मभिर्व्यस्ता द्विजा वर्णान्तद गता ।
धर्मो यज्ञक्रिया चैषा नित्य न प्रतिषिध्यते ।।
शान्ति१८१।१४ ।।

15 उत्पाद्य पुत्रपौत्र तु वन्याश्रमपद वसेत् ।
तानेवाग्नीन् यथाशास्त्रमर्चयन्नतिथिप्रिय ।। शान्ति ३१३।१८ ।।

16 उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वश ।
निर्ममत्वमनाशीस्त्वमपरिक्रीतधर्मता ।। आश्व ३८।८ ।।

17 ऋग्यजु सामवित्पूज्यो नित्य स्याद्देवविद्द्विज ।
अनृग्यजुरसामा तु प्राजापत्य उपद्रव ।। शान्ति ६०।४२ ।।

18 ऋत्विक्पुरोहितो मन्त्री दूतोऽथार्थानुशासक ।
एते क्षत्रसमा राजन् ब्राह्मणाना भवन्त्युत ।। शान्ति ७७।४ ।।

19 ऋत्विगाचार्यसपन्ना स्वेषु कर्मस्ववस्थिता ।
एते देवसमा राजन् ब्राह्मणाना भवन्त्युत ।। शान्ति ७७।३ ।।

14a व्यक्ता for व्यस्ता धर्मे for धर्मो तेषा (वैषा) for चैषा प्रतिविद्यते (०पद्यते), for ०षिध्यते

15 यत्याश्रम for वन्या० न्यसेत् for व० यथान्याय्यम् (०यस्) for ०शास्त्रम्

16 कीतिता for सर्वश निर्दमत्व for निर्ममत्व अनाशीष्ट्वम् for ०शीस्त्वम्

17 सामवत् for ०वित् पूज्या (प्राज्ञो) for पूज्यो दैवत (वेदविद्) for देववद्

19 श्रेष्ठ, (सर्व) for स्वेषु ब्रह्म– for देव

20 ऋषीणा समय नित्य ये चरन्ति युधिष्ठिर ।
निश्चिता सर्वधर्मज्ञास्तान् देवा ब्राह्मणान् विदु ॥
अनु ९०।४२ ॥

21 एववृत्तास्तु ये केचिल्लोकेऽस्मिन् सत्त्वसश्रया ।
ब्राह्मणा ब्रह्मयोनिस्थास्ते धीरा साधुदर्शिन ॥ आश्व ३८।१० ॥

22 कुर्वीतापत्यसतानमथो दद्याद्यजेत च ।
सविभज्य हि भोक्तव्य धन सद्भिरितीष्यते ॥
शान्ति ६०।११ ॥

23 कृतकृत्यस्य चारण्ये वासो विप्रस्य शस्यते ॥ शान्ति ६३।२ ॥

24 क्रोध शत्रु शरीरस्थो मनुष्याणा द्विजोत्तम ।
य क्रोधमोहौ त्यजति त देवा ब्राह्मण विदु ॥
आरण्यक १९७।३१ ॥

25 क्षत्रिय शतवर्षी च दशवर्जी च ब्राह्मण ।
पितापुत्रौ च विज्ञेयौ तयोर्हि ब्राह्मण पिता ॥ अनु ८।२० ॥

26 क्षमा धृतिरहिसा च समता सत्यमार्जवम् ।
अक्रोधश्चानसूया च शौच दाक्ष्य पराक्रम ॥ आश्व ३८।३ ॥

20 रक्षन्ति for चरन्ति धर्मेशा for धर्मज्ञा तादृशान् for तान् देवा

21 विधास्तु, (भूतादच, वृत्ताश्च), for वृत्तास्तु सत्य (सर्व) for सत्त्व ब्राह्म for ब्रह्म वीरा for धीरा सत्त्व (सर्व) for साधु

22 इतीर्यते for ०ष्यते

23 वारण्ये (सोरण्ये) for चारण्ये

24 क्रोध सुदुजय शत्रु for क्रोध स्थो यत् for य क्रोधलोभौ (०मोहान्) for ०मोहौ जयति (जयते) for त्यजति तान् for त देवान् (देव) for देवा ब्राह्मणा (स्थविर) for ब्राह्मणं द्विज for विदु

25 द्विजोत्तमा for च ब्राह्मण तस्य for तयो गुरु for पिता

26 वृत्तिर् for धृतिर् ममता for स०

27 क्षात्राणि वैश्यानि च सेवमान
शौद्राणि कर्माणि च ब्राह्मण सन् ।
अस्मिँल्लोके निन्दितो मन्दचेता
परे च लोके निरय प्रयान्ति ।। शान्ति ६२।४ ।।

28 क्षेत्रजो वाप्यपसदो येऽध्यूढास्तेषु चाप्यथ ।
आत्मवद्वै प्रयुञ्जीरन् सस्कार ब्राह्मणादय ।। अनु ४९।२७ ।।

29 चतुष्पात्सकलो धर्मो ब्राह्मणाना विधीयते ।। शान्ति ३६।२८ ।।

30 चातुराश्रम्यधर्माश्च वेदधर्माश्च पार्थिव ।
ब्राह्मणेनानुगन्तव्या नान्यो विद्यात्कथचन ।। शान्ति ६५।९ ।।

31 जन्मकर्मविहीना ये कदर्या ब्रह्मबन्धव ।
एते शूद्रसमा राजन् ब्राह्मणाना भवन्त्युत ।। शान्ति ७७।६ ।।

32 जन्मनैव महाभागो ब्राह्मणो नाम जायते ।
नमस्य सर्वभूतानामतिथि प्रसृताग्रभुक् ।। अनु ३५।१ ।।

33 जातकर्म प्रभृत्यस्य कर्मणा दक्षिणावताम् ।
क्रिया स्यादासमावृत्तेराचार्ये वेदपारगे ।। शान्ति २२६।२ ।।

34 जातकर्मादिभिर्यस्तु सस्कारै सस्कृत शुचि ।
वेदाध्ययनसपन्न षट्सु कर्मस्ववस्थित ।। शान्ति १८२।२ ।।

35 जितेन्द्रियो धर्मपर स्वाध्यायनिरत शुचि ।
कामक्रोधौ वशे यस्य त देवा ब्राह्मण विदु ।।
आरण्यक १९७।३३ ।।

27 निद्यते for निन्दितो

28 सस्कार्यो for क्षेत्रजो ये मूढास् for येऽध्यू०

30 धमश् (धर्म्यश्), for धर्माश् ०वेदवादाश्च, (०वादश्च ०वेदाश्च) for ०धर्माश्च नान्यैर्विद्धि for नान्यो विद्यात् कदाचन for कथचन

32 जन्म चैव for जन्मनैव महाबाहो for ०भागो नैव for नाम न तस्य for नमस्य ब्राह्मण for अतिथि

36 जीवित यस्य धर्मार्थं धर्मोऽरत्यर्थमेव च ।
अहोरात्राश्च पुण्यार्थं त देवा ब्राह्मण विदु ॥
शान्ति २३७।२३ ॥

37 ज्याकर्षण शत्रुनिवर्हण च
कृषिर्वणिज्या पशुपालन च ।
शुश्रूषण चापि तथार्थहेतो-
रकार्यमेतत्परम द्विजस्य ॥ शान्ति ६३।१ ॥

38 तप श्रुत च योनिश्चाप्येतद्ब्राह्मण्यकारणम् ।
त्रिभिर्गुणै समुदितस्ततो भवति वै द्विज ॥ अनु १२२।७ ॥

39 तपसा गुरुवृत्त्या च ब्रह्मचर्येण चाभिभो ।
देवताना पितृणा चाप्यनृणश्चानसूयक ॥ शान्ति ३१३।१५ ॥

40 तपोधर्मदमेज्याभिर्विप्रा यान्ति यथा दिवम् ॥
आरण्यक १४६।५१ ॥

41 तपोनित्येन दान्तेन मुनिना सयतात्मना ।
अजित जेतुकामेन भाव्य सगेष्वसगिना ॥ शान्ति १८२।१४ ॥

42 तपो यज्ञस्तथा विद्या भैक्षमिन्द्रियनिग्रह ।
ध्यानमेकान्तशीलत्व तुष्टिर्दान च शक्तित ॥ शान्ति २३।८ ॥

36 अहोरात्र ०रात्राश्

37 सक० for ज्याक० आकर्षण शकुनिवहण च for ज्या च
तुष्टिर् for कृषिर् (आ)त्म for (अ)र्थ

38 लक्षण for कारण स्नातो for ततो

39 वा विभो for चाभिभो ऋषीणा for पितृणा ह्यन० for
चान०

40 तु वै for यथा

41 तपोनिष्ठेन for ०नित्येन दानेन (दान्त्येन) for दान्तेन सगैश्च
for सगेषु

42 दमो for तपो तपो for तथा सयम for निग्रह तथा हि
for ध्यानम् ज्ञान for दान

43 तस्माद्धर्मो विहितो ब्राह्मणस्य
दम शौच चार्जव चापि राजन् ।। शान्ति ६३।७ ।।

44 तस्मात्प्राणभृता सर्वान् न हिस्याद्ब्राह्मण क्वचित् ।।
आदि ११।१२ ।।

45 तिस्र कृत्वा पुरो भार्या पश्चाद्विन्देत ब्राह्मणीम् ।
सा ज्येष्ठा सा च पूज्या स्यात्सा च ताभ्यो गरीयसी ।।
अनु ४७।३१ ।।

46 तेष्वप्रमाद कुर्वीत त्रिषु कर्मसु धर्मवित् ।
दान्तो मैत्र क्षमायुक्त सर्वभूतसमो मुनि ।। आश्व ४५।२४ ।।

47 त्रीणि कर्माणि यानीह ब्राह्मणाना तु जीविका ।
यजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रह ।। आश्व ४५।२२ ।।

48 त्रैवार्षिकाद्यदा भक्तादधिक स्याद्द्विजस्य तु ।
यजेत तेन द्रव्येण न वृथा साधयेद्धनम् ।। अनु ४७।२२ ।।

49 त्रैविद्याना च या गतिर्ब्राह्मणाना
यश्चैवोक्तोऽथाश्रमो ब्राह्मणानाम् ।
एतत्कर्म ब्राह्मणस्याहुरग्र्यम्
अन्यत्कुर्वन् शूद्रवच्छस्त्रवध्य ।। शान्ति ६५।८ ।।

43 मादव for चार्जव आश्रम (आश्रमात्) for ०मा एव for राजन वै विसृष्टा (सनिविष्टा, सनिसृष्टा) for वै नि०

45 कन्या for कृत्वा पुरा for पुरो

46 (अ)प्रसाद (प्रमाद्र, प्रसाद, (अ)प्रदान) for ०माद, कुवन्व, लोकेषु for कमसु कमवित् (०कृत्) for धम० शातो for दान्तो क्रिया for क्षमा तत्त for भूत

47 जानीहि (जानीत) for यानीह शुभाच्चापि for शुद्धा, परिग्रह for प्रति०

48 यतेत for यजेत सादयेत् for साधयेत्।

49 चाश्रमो for ऽथाश्रमो सव for कर्म. क्षत्रियस्य for ब्राह्मणस्य आद्यम् for अग्र्यम् कर्मा for कुर्वन् (तत्र वज्य, तात मन्य, तामतान्य, तात मान्य, तात वर्ज्य) for शस्त्रवध्य .

50 त्रैविद्यो ब्राह्मणो विद्वान्नचाध्ययनजीवन ।
त्रिकर्मा त्रिपरिक्रान्तो मैत्र एष स्मृतो द्विज ।। अनु १२६।६ ।।

51 दममेव महाराज धर्ममाहु पुरातनम् ।
स्वाध्यायोऽध्यापन चैव तत्र कर्म समाप्यते ।। शान्ति ६०।६ ।।

52 धर्मश्च सत्य च दमस्तपश्च
अमात्सर्य ह्रीस्तितिक्षानसूया ।
यज्ञश्च दान च धृति श्रुत च
महाव्रता द्वादश ब्राह्मणस्य ।। उद्योग ४३।१२ ।।

53 न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च य ।
सर्वभूतेष्वभयदस्त देवा ब्राह्मण विदु ।। शान्ति २३७।१४ ।।

54 न तस्या जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति ।
ब्राह्मणी त्वेव तत्कुर्याद् ब्राह्मणस्य युधिष्ठिर ।। अनु ४७।३३ ।।

55 न योनिर्नापि सस्कारो न श्रुत न च सनति ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ।। अनु १३१।४६ ।।

56 नावनीत हृदय ब्राह्मणस्य वाचि क्षुरो निहितस्तीक्ष्णधार ।।
आदि ३।१३२ ।।

50 त्रिविधो for त्रैविद्यो तथा for न च
In the second line, the critical ed reads विकर्मा, विपरिक्रान्तो
51 दानम् for दमम् धम प्राहु for धममाहु सनातन (मनीषिण) for पुरातनम् ऽध्ययन for ऽध्यापन तत for तत्र
52 ज्ञान for धर्मश् श्रुत for तपश् निर्मात्सय for अमा०
53 कुप्येन्, for क्रुध्येन् च for प्र
54 कुर्याद्वा (तान्कुर्याद्) for तत्कुर्याद्
55 सत्कारो for सस्कारो श्रुति for श्रुत सतति for सनति
56 क्षुरधार for तीक्ष्ण०

57 नित्य क्रोधात्तपो रक्षेच्छ्रियं रक्षेत मत्सरात् ।
विद्या मानावमानाभ्यामात्मान तु प्रमादत ॥
शान्ति १८२।१० ॥

58 नित्यस्वाध्यायता धर्मो धर्मो यज्ञ सनातन ।
दान प्रशस्यते चास्य यथाशक्ति यथाविधि ॥ अनु १२६।६ ॥

59 नित्योदकी नित्ययज्ञोपवीती
नित्यस्वाध्यायी पतितान्नवर्जी ।
ऋत ब्रुवन् गुरवे कर्म कुर्वन्
न ब्राह्मणश्च्यवते ब्रह्मलोकात् ॥ उद्योग ४०।२३ ॥

60 निराशिषमनारम्भ निर्नमस्कारमस्तुतिम् ।
अक्षीण क्षीणकर्माण त देवा ब्राह्मण विदु ॥ शान्ति २३७।२४ ॥

61 निर्ममो निरहकारो निराशी सर्वत सम ।
अकामहत इत्येष सता धर्म सनातन ॥ आश्व ३८।५ ॥

62 परिग्रहान् परित्यज्य भवेद् बुद्ध्या जितेन्द्रिय ।
अशोक स्थानमातिष्ठेदिह चामुत्र चाभयम् ॥
शान्ति १८२।१३ ॥

57 नित्य for नित्य यगाच् for क्रोधात् श्रिय (०या) for तपो श्रेयो for श्रिय रक्षेच्च for रक्षेत प्रसादत for प्रमा०
58 नित्य (नित्य) for नित्य स्वाध्यायिता for ०यता
59 नित्य for नित्य जात for ऋत वदन् for ब्रुवन् ब्राह्मण्य for ब्राह्मण स्वर्ग० for ब्रह्म०
60 निरा० for अना० आस्तिक for अस्तुतिम्
61 निर्मोहो for निर्ममो० सवृत for सवत भूतfor हत
62 परिग्रहात्, ९ग्रह for ०ग्रहान् वध्य, शुद्ध्या for बुद्ध्या, अशक्य, असख्य, अनल for अशोक आचष्टेद् for आतिष्ठेद् इष्ट्वा for इह चौभयो for चाभयम्

63 परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मण
कुर्यादन्यन्न वा कुर्यान्मैत्री ब्राह्मण उच्यते ।। शान्ति ६०।१२ ।।

64 पूर्वं हि ब्राह्मणा सृष्टा इति धर्मविदो बिदु ।
ज्येष्ठेनाभिजनेनास्य प्राप्त सर्वं यदुत्तरम् ।। शान्ति ७४।३० ।।

65 प्रतिग्रहेण तेजो हि विप्राणा शाम्यतेऽनघ ।
प्रतिग्रह ये नेच्छेयुस्तेऽपि रक्ष्यास्त्वयानघ ।। अनु ३५।२३ ।।

66 ब्रह्मचारी च वेदान् यो अधीयीत द्विजोत्तम ।
स्वाध्याये चाप्रमत्तो वै त देवा ब्राह्मण विदु ।।
आरण्यक १९१।३६ ।।

67 ब्राह्म स्वभाव कल्याणि सम सर्वत्र मे मति ।
निर्गुण निर्मल ब्रह्म यत्र तिष्ठति स द्विज ।। अनु १३१।५१ ।।

68 ब्राह्मणस्त्रिषु कालेषु शस्त्र गृह्णन् न दुष्यति ।
आत्मत्राणे वर्णदोषे दुर्गस्य नियमेषु च ।। शान्ति ७९।३३ ।।

63 कार्यं तु (कर्माणि, कर्मा हि, कर्मा तु) for कार्यस्तु . अकुर्याद् for the first कुर्याद् अन्त्य न for अन्यन्न

64 सृष्टिर् (सृष्ट) for सृष्टा यदि for इति. ब्रह्म for धर्म श्रेष्ठो न (ज्येष्ठा न, ज्यैष्ठेन) for ज्येष्ठेन पूव for सव

65 तेजोभि for तेजो हि हीयते for शाम्यते न कुर्यु for नच्छेयु. तेष्वारक्ष्य for तेऽपि रक्ष्याम् नृप for (अ) नघ

66 धमचारी for ब्रह्मचारी

67 सुश्रोणि for कल्याणि गत for मति निमम (निर्दम) for निर्गुण

68 लोकेषु (वर्णेषु) for कालेषु प्रजारक्षो for आत्मत्राणे वर्णदोष (दस्युदोषे, सर्वदोषे) for वर्णदोषे दुर्दम्य (दुर्दस्य) for दुगस्य.

69 ब्राह्मणस्य विशुद्धस्य तपस्यभिरतस्य च ।
निराशिषो वदान्यस्य लोका ह्यक्षरसज्ञिता ।।
शान्ति ६२।७ ।।

70 ब्राह्मणस्यापि चेद्राजन् क्षत्रधर्मेण तिष्ठत ।
प्रशस्त जीवित लोके क्षत्र हि ब्रह्मसस्थितम् ।।
शान्ति २२।६ ।।

71 ब्राह्मणस्य हि देहोऽय न कामार्थाय जायते ।।
शान्ति ३०९।२२ ।।

72 ब्राह्मणाना क्षमा बलम् ।। आदि १६५।२८ ।।

73 ब्राह्मणाना यथा धर्मो दानमध्ययन तप ।। शान्ति ५५।१४ ।।

74 ब्राह्मणेषु हि यो धर्म स धर्म परमो मत ।। अनु १२९। ३ ।।

75 ब्राह्मणो नाम भगवान् जन्म प्रभृति पूज्यते ।।
शान्ति २६१।११ ।।

76 ब्राह्मणो जातमात्रस्तु पृथिवीमन्वजायत ।
ईश्वर सर्वभूताना धर्मकोशस्य गुप्तये ।। शान्ति ७३।६ ।।

77 ब्राह्मण्य बहुभिरवाप्यते तपोभि-
स्तल्लब्ध्वा न परिपणेन हेडितव्यम् ।
स्वाध्याये तपसि दमे च नित्ययुक्त
क्षमार्थी कुशलपर सदा यतस्व ।। शान्ति ३०९।२३ ।।

69 वदान्यस्य for विशुद्धस्य समिता (सज्ञका) for सज्ञिता

70 तद् (ते, वै) for चेत् धर्मे तु (वर्तत) for तिष्ठत क्षात्र for क्षत्र सभवम् (सहितम्, सजितम्, समितम्) for सस्थितम्

75 भगवन् for भग०

76 जायमानो (तापमानो) for जातमात्रस् अध्यजा० (अभ्य०) for अन्व० ० वर्णाना for भूताना. धर्मकामस्य (धम [कर्म, सर्व] कोषस्य) for धम०

77 अवाप्येते (०प्यतत्) for ० प्यते क्रीडितव्य (हेलितव्य) for हेडि० स्वाध्यायस् for ०ये दमेन for दमे च मोक्षार्थी for क्षेमार्थी यतस्तु (यजस्व) for यतस्व

78 भार्यां गच्छन् ब्रह्मचारी ऋतौ भवति ब्राह्मण ॥
आरण्यक १९९।१२ ॥

79 भार्याश्चतस्रो विप्रस्य द्वयोरात्मास्य जायते ।
आनुपूर्व्याद् द्वयोर्हीनौ मातृजात्यौ प्रसूयत ॥ अनु ४८।४ ॥

80 मन प्राणे निगृह्णीयात्प्राण ब्रह्मणि धारयेत् ।
निर्वाणादेव निर्वाणो न च किंचिद् विचिन्तयेत् ।
सुख वै ब्राह्मणो ब्रह्म स वै तेनाधिगच्छति ॥
शान्ति १८२।१६ ॥

81 मित्रता सर्वभूतेषु दानमध्ययन तप ।
ब्राह्मणस्यैव धर्म स्यान्न राज्ञो राजसत्तम ॥ शान्ति १४।१५ ॥

82 मुधा ज्ञान मुधा वृत्त मुधा सेवा मुधा श्रम ।
एव यो युक्तधर्म स्यात्सोऽमुत्रानन्त्यमश्नुते ॥ आश्व ३८।४ ॥

83 मुधा दान मुधा यज्ञो मुधाधीत मुधा व्रतम् ।
मुधा प्रतिग्रहश्चैव मुधा धर्मो मुधा तप ॥ आश्व ३८।९ ॥

79 च तिस्रो for चतस्रो च द्वौ for द्वयो मातृजातौ (० जात्या, जन्यौ) for जात्यौ प्रसूयते for ०त

80 निर्वेदाद् (निर्वादाद्, निर्याणाद) for निर्वाणाद् निर्वाण (निर्वार्यो) for ०णो विचारयेत् for विचिन्तयेत् दुख for सुख ब्रह्मणो for ब्रा०

81 मैत्रता for मि० –लोकेषु for भूतेषु

82 मुदा ज्ञान मुदा वृत्त for मुधा वृत्त ध्रुव for एव युक्तस्य for यो युक्त धर्मयुक्त for युक्तधम ऽप्यत्र for ऽमुत्र अत्यत for आनन्त्यम्

83 मुदादान (मधुदान, मुधानाम) for मुधादान व्रत for तप

84 य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ।
वेदानधीत्य नियतो दक्षिणामपवर्ज्य च ।
अभ्यनुज्ञामथ प्राप्य समावर्तेत वै द्विज ।। शान्ति ३१३।१६ ।।

85 य स्याद्दान्त सोमप आर्यशील
सानुक्रोश सर्वसहो निराशी ।
ऋजुर्मृदुरनृशस क्षमावान्
स वै विप्रो नेतर पापकर्मा ।। शान्ति ६३।८ ।।

86 य क्रोधमोहौ त्यजति त देवा ब्राह्मण विदु ।।
आरण्यक १९७।३१ ।।

87 यजन याजन चैव तथा दानप्रतिग्रहौ ।
अध्यापनमधीत च षट्कर्मा धर्मभाग् द्विज ।। अनु १२९।८ ।।

88 यत्कार्य ब्राह्मणेनेह जन्म प्रभृति तच्छृणु ।
कृतोपनयनस्तात भवेद् वेदपरायण ।। शान्ति ३१३।१४ ।।

89 यत्रेदानी महासर्प सस्कृत वृत्तमिष्यते ।
त ब्राह्मणमह पूर्वमुक्तवान् भुजगोत्तम ।। आरण्यक १७७।३२ ।।

90 यथा दारुमयो हस्ती यथा चर्ममयो मृग ।
ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारका ।। शान्ति ३७।३९ ।।

84 नियमो for नियतो अपिवर्ज्य (अपवर्य, उपवर्ज्य) for अपवर्ज्य अनु for अथ ज्ञाप्य for प्राप्य

85 यस्माद् for य स्याद् चानृ० for अनृ० स एव for स वै. चेतर for ने०

86 यत् for य ०लोभौ (०मोहान्) for ०मोहौ जयति (०ते) for त्यजति तान् for त देवान् (देव) for देवा ब्राह्मणा स्थविर for ब्राह्मण द्विज for विदु

87 परिग्रहौ for प्रति० धमतो for धर्मभाग्

89 सत्कृत (यत्कृत, ०ते) for सस्कृत तु भुजगम for भुजगोत्तम

90 दानमयो for दारु० बिभ्रति for ०धारका

91 यथा षण्ढोऽफल स्त्रीषु यथा गौर्गवि चाफला ।
शकुनिर्वाप्यपक्ष स्यान्निर्मन्त्रौ ब्राह्मणस्तथा ॥
शान्ति ३७।४० ॥

92 यस्य चात्मसमो लोको धर्मज्ञस्य मनस्विन ।
सर्वधर्मेषु च रतस्त देवा ब्राह्मण विदु ॥
आरण्यक १९७।३४ ॥

93 यस्य सर्वे समारम्भा निराशीर्बन्धनास्त्विह ।
त्यागे यस्य हुत सर्वं स त्यागी स च बुद्धिमान् ॥
शान्ति १८२।११ ॥

94 या सज्ञा विहिता लोके दासे शुनि वृके पशौ ।
विकर्मणि स्थिते विप्रे ता सज्ञा कुरु पाण्डव ॥ शान्ति ६२।५ ॥

95 येन केनचिदाच्छन्नो येन केनचिदाशित ।
यत्र क्वचनशायी च त देवा ब्राह्मण विदु ॥
शान्ति २३७।१२ ॥

96 येन पूर्णमिवाकाश भवत्येकेन सर्वदा ।
शून्य येन जनाकीर्णं त देवा ब्राह्मणं विदु ॥
शान्ति २३७।११ ॥

91 (अ) भक्ष्य for (अ) पक्ष

92 चात्मसमा for चात्म० स्थविर for ब्राह्मण

93 परिग्रहा for समा० निराशा (निराशी) for ०शीर् कृत (हुत) for हुत

94 निहिता for विहिता

95 आच्छिन्नो for आच्छन्नो आस्थित for आशित स्यात् for च

96 पूर्वम् for पूर्णम्, एतेन for एकेन यस्य for येन जलाकीर्णं for जना०.

97 योऽध्यापयेदधीयीत यजेद्वा याजयीत वा ।
दद्याद्वापि यथाशक्ति त देवा ब्राह्मण विदु ॥
आरण्यक १९७।३५ ॥

98 यो वदेदिह सत्यानि गुरु सतोषयेत च ।
हिसितश्च न हिसेत त देवा ब्राह्मण विदु ॥
आरण्यक १९७।३२ ॥

99 यो विकर्मस्थितो विप्रो न स समानमर्हति ।
कर्मस्वनुपयुञ्जानमविश्वास्य हि त विदु ॥ शान्ति ६५।११ ॥

100 यो हि ब्राह्मणमुत्सृज्य क्षत्रधर्मरतो द्विज ।
स वध्य सर्वलोकस्य . . . . . ॥ द्रोण १३५।३३ ॥

101 राजप्रैष्य कृषिधन जीवन च वणिज्यया ।
कौटिल्य कौलटेय च कुसीद च विवर्जयेत् ॥ शान्ति ६३।३ ॥

97 अधीयेद्वा for अधीयीत अपि (चापि) for वापि हिसीत for हिसेत देवान् (देव) for देवा स्थविर for ब्राह्मण

98 वदेत हि (वै ददाति) for वदेदिह

99 योधिकर्म (यो विकर्मा), for यो विकम

100 —धर्मरतिर् for ०रतो द्विज— (क्षत्र—) for सर्व— —लोकेषु for —लोकस्य

101 राजप्रेष्य (राज्यप्रेष्य) for राज० वणिक्पथा for ०ज्यया कौलुष्ट्र, (कौलष्ट्र, कौटिल) for कौटिल्य कौटिलेय (कौलुटेय, कौटिलीय, कौटलेय) for कौल०

102 विद्याद्बहु पठन्त त बहुपाठीति ब्राह्मणम् ।
तस्मात्क्षत्रिय मा मस्था जल्पितेनैव ब्राह्मणम् ।
य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ।।
उद्योग ४३।२९ ।।

103 विद्यालक्षणसपन्ना सर्वत्राम्नायदर्शिन ।
एते ब्रह्मसमा राजन् ब्राह्मणा परिकीर्तिता ।।
शान्ति ७७।२ ।।

104 विमुक्त सर्वसगेभ्यो मुनिमाकाशवत् स्थितम् ।
अस्वमेकचर शान्त त देवा ब्राह्मण विदु ।।
शान्ति २३७।२२ ।।

105 विश्रम्भो ह्रीस्तितिक्षा च त्याग शौचमतन्द्रिता ।
आनृशस्यमसमोहो दया भूतेष्वपैशुनम् ।। आश्व ३८।६ ।।

106 शमो दमस्तप शौच क्षान्तिरार्जवमेव च ।
ज्ञान विज्ञानमास्तिक्य ब्रह्मकर्म स्वभावजम् ।। भीष्म ४०।४२ ।।

102 विद्याद्बहुविध त तु (विद्या ब्रह्म पठत तु०, °द्बहु पर त तु०, °ब्रह्मपद त तु, °द्बहुफल त तु) for विद्याद्बहु० बहुवागिति (०पाठी तु, पाठ तु, बहुपाठ) for बहुपाठी न हि क्षत्रिय पथा वै for तस्मात्क्षत्रिय मा मस्था जपितेन (जपती न, जहि तेन, मन्त्रे तेन) for जल्प०

103 सर्वाम्नायप्रदशिन (सवत्र समदर्शिन) for सर्व न

104 वियुक्त (विमुक्त) for ०क्त मुनिर् for मुनिम् स्थित for स्थितम् अल for अस्वम् एव पर for एकचर दात for शान्त देवाना for त देवा

105 यथा for दया पैशुन, (वै शुभ) for (अ) पैशुनम्

106 तथा शौच for तप शौच ब्राह्म कर्म for ब्रह्म कर्म. प्रभावजं for स्वभावजम्

107 शूद्रा शयनमारोप्य ब्राह्मण पीडितो भवेत् ।
प्रायश्चित्तीयते चापि विधिदृष्टेन हेतुना ।। अनु ४७।६ ।।

108 शूद्रो राजन् भवति ब्रह्मबन्धु-
र्दुश्चारित्र्यो यश्च धर्मादपेत ।
वृषलीपति पिशुनो नर्तकश्च
ग्रामप्रैष्यो यश्च भवेद्विकर्मा ।। शान्ति ६३।४ ।।

109 शौचाचारस्थित सम्यग् विघसाशी गुरुप्रिय ।
नित्यव्रत सत्यपर स वै ब्राह्मण उच्यते ।। शान्ति १८२।३ ।।

110 शौचेन सतत युक्तस्तथाचारसमन्वित ।
सानुक्रोशश्च भूतेषु तद् द्विजातिषु लक्षणम्।।
शान्ति १८२।१७ ।।

111 श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत् ।
धृत्या द्वितीयवान् भवति बुद्धिमान् वृद्धसेवया ।।
आरण्यक २९७।२९ ।।

112-112a षट्कर्मसप्रवृत्तस्य आश्रमेषु चतुर्ष्वपि ।
सर्वधर्मोपपन्नस्य सभूतस्य कृतात्मन ।
ब्राह्मणस्य विशुद्धस्य तपस्यभिरतस्य च
निराशिषो वदान्यस्य लोका ह्यक्षरसज्ञिता ।।
शान्ति ६२।६-७ ।।

107 पतितो (पिण्डितो) for पीडितो
108 शूरो for शूद्रो ब्रह्मविदुर् for बन्धुर् नतकश्च (नातकश्च, नर्तनश्च, ०स्य) for नर्तकश्च राजप्रेष्यो (प्राय प्रेष्यो) for ग्रामप्रैष्यो
109 शौचाचारै for ०चार रत for स्थित विदिताशी for ०विघसा० सत्यपक्ष for ०पर सत्तम for उच्यते
110 सदाचार for तथा०
111 सहाय for द्वितीय धर्म for वृद्ध०
112 यद्भूतस्य (सभू०, सवृ०) सभूयस्व, सद्भूतश्च) for सभू—

113 षडिमानि तु कर्माणि प्रोवाच भुवनेश्वर ।
वृत्त्यर्थं ब्राह्मणाना वै शृणु तानि समाहिता ॥
अनु १२९।७ ॥

114 सत्य दान दमोऽद्रोह आनृशस्य क्षमा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृत ॥ शान्ति १८२।४ ॥

115 सत्य दान क्षमा शीलमानृशस्य दमो घृणा ।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृत ॥
आरण्यक १७७।१६ ॥

116 सत्ये वै ब्राह्मणस्तिष्ठन् ब्रह्म पश्यति क्षत्रिय ।
वेदाना चानुपूर्व्येण एतद्विद्वन् ब्रवीमि ते ॥ उद्योग ४३।३७ ॥

117 समावृत्तस्तु गार्हस्थ्ये सदारो नियतो वसेत् ।
अनसूयुर्यथान्यायमाहिताग्निस्तथैव च ॥ शान्ति ३१३।१७ ॥

118 सर्वभूतेषु धर्मज्ञ मैत्रो ब्राह्मण उच्यते ॥ आदि २०९।५ ॥

113 मनुजेश्वर for ०र शृणु धर्मान् सनातनान् for शृणु ता

114 तपोद्रोह (अथोद्रोह, तपोक्रोध, अथाद्रोह, दमोद्रोहम्) for दमोऽद्रोह दमश् for तपश् तत्र (यस्य) for यत्र. स्थित for स्मृत

115 दाक्ष्य for दान तप for क्षमा शौचम् for शीलम् तपो for दमो राजेन्द्र for नागेन्द्र स्मृति for स्मृत

117 समावृत्य (०वत, ०वर्त्य, ०वर्तस्, ०वृत्यस्, ०वृत्ते) for वृत्तस् च for तु अनादृत (अनावृत) for तथैव च

118 सर्व for धर्म

119 सर्वास्ववस्थास्वेतानि ब्राह्मण परिवर्जयेत् ।
एतेषा विक्रयात्तात ब्राह्मणो नरक व्रजेत् ।। शान्ति ७९।५ ।।

120 सर्वोऽय ब्राह्मणो लोके वृत्तेन तु विधीयते ।
वृत्ते स्थितश्च सुश्रोणि ब्राह्मणत्व निगच्छति ।।
अनु १३१।५० ।।

121 सर्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रह ।
एतत्पवित्र ज्ञातव्य तथा चैवात्मसयम ।। शान्ति १८२।६ ।।

122 स वनेऽग्नीन् यथान्यायमात्मन्यारोप्य धर्मवित् ।
निर्द्वन्द्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् ।।
शान्ति ३१३।१६ ।।

123 सपतन् देहजालानि कदाचिदिह मानुषे ।
ब्राह्मण्य लभते जन्तुस्तत् पुत्र परिपालय ।।
शान्ति ३०६।२१ ।।

124 सुरा लवणमित्येव तिलान् केसरिण पशून् ।
ऋषभान् मधु मास च कृतान्न च युधिष्ठिर ।।
शान्ति ७६।४ ।।

119 एतासु for एतानि सर्व विक्रयवृत्तानि for सवा नि एतस्य for एतेषा विक्रयो for विक्रयात् नरके for नरक पतेत् for व्रजेत्

120 विचाल्यते (विचायते) for विधीयते तु शूद्रोऽपि for च सुश्रीणि नियच्छति for निग०

122 सर्वानग्नीन् (स च तेऽग्नीन्) for स वनेऽग्नीन् आत्मना for आत्मनि (आधाय) for आरोप्य

123 मोह for देह ब्रह्मण्य for ब्राह्म० तदत्र for तत्पुत्र

124 सुरा for सुरा एव (एतत्) for एव वृषभान् for ऋष०.

125 स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
गुरुर्हि सर्ववर्णानां ज्येष्ठः श्रेष्ठश्च वै द्विजः ॥
शान्ति ७३।११ ॥

126 स्वाध्याय एषां देवत्वं तप एषां सतामिव ।
मरणं मानुषो भावः परिवादोऽसतामिव ॥
आरण्यक २९७।३१ ॥

127 हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तता ।
शान्तिकर्म विशुद्धिश्च शुभा बुद्धिर्विमोचनम् ॥
आश्व ३८।७ ॥

125 वस्त for वस्ते च for हि

126 एव for एषां भय वै for मरणं

127 चष्टिर् for तु०, विवित्सा for विस्मयश् सार for साधु वृत्तय (–वृत्तिता) for वृत्तता –कर्मश्च for –कर्म वि, भावशुद्धिर् for शुभाबुद्धिर्, विनोदन, विमोहन, विमोवन for विमोचनम् ।

III. वर्णविवेके

क्षत्रियवर्णः क्षत्रियधर्माश्च।

1 अधीत्य वेदान् परिसस्तीर्य चाग्नी
निष्ट्वा यज्ञै पालयित्वा प्रजाश्च ।
गोब्राह्मणार्थे शस्त्रपूतान्तरात्मा
हत सग्रामे क्षत्रिय स्वर्गमेति ।।
उद्योग ४०।२४ ।।

2 अविक्षतेन देहेन समराद्यो निवर्त्तते ।
क्षत्रियो नास्य तत्कर्म प्रशसन्ति पुराविद ।। शान्ति ६०।१६ ।।

3 आत्मत्याग सर्वभूतानुकम्पा लोकज्ञान मोक्षण पालन च ।
विषण्णाना मोक्षण पीडिताना क्षात्रे धर्मे विद्यते पार्थिवानाम् ।।
शान्ति ६४।२६ ।।

4 आर्तहस्तप्रदो राजा प्रेत्य चेह महीयते ।
गोब्राह्मणार्थे विक्रान्त सग्रामे निधन गत ।।
अश्वमेधजितान् लोकान् प्राप्नोति त्रिदिवालये ।।
अनु १२८।५२ ।।

1 स्वर्गभाक् स्यात् for स्वर्गमेति

3 आत्मज्ञान for ०त्याग भूतानुकपी for कम्पा लोकाज्ञान for ०ज्ञान लक्षण पालन (मोक्ष पालन, पालन मोक्षण, पावन मोक्षण) for मोक्षण पालन निषण्णाना for विष० क्षात्रधर्मे (क्षात्रो धर्मो) for क्षात्रे धर्मे

4 अश्वमेधार्जितांल्लोँकान् for अश्वमेध० प्राप्नोति त्रिदिव गतः (सम्प्राप्नोति दिव गत) for प्राप्नोति त्रिदिवालये

5 आहूतेन रणे नित्य योद्धव्य क्षत्रबन्धुना ।
धर्म्य स्वर्ग्य च लोक्य च युद्ध हि मनुरब्रवीत् ।।
शान्ति ५५।१७ ।।

6 इष्वस्त्रमेषा देवत्व यज्ञ एषा सतामिव ।
भय वै मानुषो भाव परित्यागोऽसतामिव ।।
आरण्यक २९७।३३ ।।

7 एष धर्म क्षत्रियाणा प्रजाना परिपालनम् ।। शान्नि २४।२९ ।।

8 क्षतात् त्राता क्षताज्जीवन् क्षान्तस्त्रिष्वपि साधुषु ।
क्षत्रिय क्षितिमाप्नोति क्षिप्र धर्म यश श्रियम् ।।
द्रोण १९८।४ ।।

9 क्षत्रज सेवते कर्म वेदाध्ययनसमत ।
दानादानरतिर्यश्च स वै क्षत्रिय उच्यते ।। शान्ति १८२।५ ।।

10 क्षत्रधर्मो महारौद्र शस्त्रनित्य इति स्मृत
वधश्च भरतश्रेष्ठ काले शस्त्रेण सयुगे ।। शान्ति २२।५ ।।

5 अयत्तेन for आहूतेन बान्धवान् for बन्धुना स्वग्य हि (स्वर्ग च) for स्वर्ग्य च लोक (युद्ध, लोक्य) for लोक्य क्षत्रस्य (युद्ध च) for युद्ध हि

6 दानम् for यज्ञ मरण for भय वै

7 एव for एष

8 क्षतत्राता (क्षत्रजातान्) for क्षतात्त्राता क्षताज्जीव (जीव, क्षतो जीवन्, क्षप्ता जीवन्, क्षता जीवन्, क्षमाज्जीवी, क्षताजीव, क्षताजीवी, क्षताज्जीर्ण) for क्षताज्जीवन् क्षातश्रीषु for क्षान्तस्त्रिषु अथ for अपि क्षातिम् for क्षितिम् प्रिय for क्षिप्र

9 क्षतज for क्षत्रज सेवके for ० ते यस्तु for कर्म समित for समत रतश् for रतिस् चैव for यश्च

10. क्षात्रधर्मो, (क्षत्रधर्मे) for क्षत्रधर्मो, शास्त्रनित्य (शश्वच्छत्य) for शास्त्र०

11 क्षत्र याति तथा स्वर्ग भुवि निग्रहपालनै ।
सम्यक् प्रणीय दण्ड हि कामद्वेषविवर्जित ।
अलुब्धा वितगक्रोधा सता यान्ति सलोकताम् ॥
आरण्यक १४९।५२ ॥

12 क्षत्रियाणा तथा कृष्ण समरे देहपातनम् ॥ शान्ति ५५।१४ ॥

13 क्षत्रियो हि स्वधर्मेण श्रिय प्राप्नोति भूयसीम् ।
राजा दण्डधरो राजन् रक्षा नान्यत्र क्षत्रियात् ॥
अनु ४७।४१ ॥

14 क्षत्रिय क्षत्रियस्यैव कुर्वाणो वधमोक्षणम् ।
विपुला कीर्तिमाप्नोति लोकेऽस्मिश्च परत्र च ॥
आदि १५०।२२ ॥

15 क्षत्रियस्य स्मृतो धर्म प्रजापालनमादित ।
निर्दिप्टफलभोक्ता हि राजा धर्मेण युज्यते ॥ अनु २२८।४७ ॥

16 क्षत्रियस्यापि भार्ये द्वे विहिते कुरुनन्दन ।
तृतीया च भवेच्छूद्रा न तु दृष्टान्तत स्मृता ॥ अनु ४७।४७ ॥

17 क्षत्रियाणा बल तेज ॥ आदि १६५।२८ ॥

11 क्षत्रिया हि for क्षत्र याति यथा for तथा भूमि for भुवि
बधन for निग्रह, ० क्रोध for ० द्वेष

12 देहयातना for ० पातनम्

13 क्षत्रियोऽपि for क्षत्रियो हि, राज for राजा

16 या for च दृष्टा न तु for दृष्टान्तत स्मृता (कृता) for स्मृता
न तु दृष्टा न तु स्मृता for न तु स्मृता

18 चातुराश्रम्यधर्माश्च जातिधर्माश्च पाण्डव ।
लोकपालोत्तराश्चैव क्षात्रे धर्मे व्यवस्थिता ।। शान्ति ६४।१ ।।

19 तत पृथिव्या गोप्तार क्षत्रिय दण्डधारिणम् ।
द्वितीय वर्णमकरोत् प्रजानामनुगुप्तये ।। शान्ति ७३।७ ।।

20 तत्र राज्ञ परो धर्मो दम स्वाध्याय एव च ।
अग्निहोत्रपरिस्पन्दो दानाध्ययनमेव च ।। अनु १२८।४६ ।।

21 तिस्र क्षत्रियसबन्धाद् द्वयोरात्मास्य जायते ।। अनु ४८।७।।

22 विपरीतमेतदुभय क्षत्रियस्य वाड् नाबनीती हृदय तीक्ष्णधारम् ।।
आदि ३।१३२ ।।

23 तेषा ज्यायस्तु कौन्तेय दण्डधारणमुच्यते ।
बल हि क्षत्रिये नित्य बले दण्ड समाहित ।। शान्ति २३।१३ ।।

24 दण्डधारणमुग्रत्व प्रजाना परिपालनम् ।। आदि ११।१५ ।।

25 दद्याद्राजा न याचेत यजेत न तु याजयेत् ।। शान्ति ६०।१३ ।।

18 चतुराश्रम्य (चतुराश्रम, चातुराश्रम) for ० श्रम्य युक्ताश्च for धर्माश्च यति (राज) for जाति वेदोत्तराश् for पालो०. क्षात्रधर्मे (क्षत्रेधर्मे, क्षात्रोधर्मे, धर्मा क्षात्रे) for क्षात्रे धर्मे समाहिता (समर्पिता) for व्यवस्थिता

19 अत for तत यतार (गाधार) for गोप्तार क्षत्रिय for द्वितीय दडम् (धर्मम्) for वणम् इह for अनु तृप्तये (गोप्तये) for गुप्तये

20 तस्य for तत्र वा for च

21 सबद्धात् for सबन्धात्

22 अस्य मुख नवनीत for वाड् ना० क्षुरधार for तीक्ष्ण०

23. एषा for तेषा राज्याय (ज्यायश्च, [ऽ] ध्यायश्च) for ज्यायस्तु बल for बले

25. तत्र for दद्याद् राजन् for राजा यजेत्तु for यजेत न च (ननु. च न) for न तु

26 दानमध्ययनं यज्ञो योग क्षेमो विधीयते ।
तस्माद्राज्ञा विशेषेण योद्धव्यं धर्ममीप्सता ।।
शान्ति ६०।१८ ।।

27 धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ।।
भीष्म २४।३१ ।।

28 न त्यागो न पुनर्याच्ञा न तपो मनुजेश्वर ।
क्षत्रियस्य विधीयन्ते न परस्वोपजीवनम् ।। शान्ति २२।७ ।।

29 नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्यात् पराक्रमम् ।।
शान्ति ६०।१४ ।।

30 परिनिष्ठितकार्यं स्यान्नृपति परिपालनात् ।
कुर्यादन्यन्न वा कुर्यादैन्द्रो राजन्य उच्यते ।। शान्ति ६०।२० ।।

31 पादावकृष्टो राजन्ये तथा धर्मो विधीयते ।। शान्ति ३६।२८ ।।

26 यज्ञे (राज्ञो) for यज्ञो राज्ञ क्षेमो (क्षेमे) [राज्ञा क्षेमो, राज्ञा धर्मो, राजधर्मो, रागक्षेमो, राज्ञा क्षेमे] for योग क्षेमो निवतते for विधीयते रक्षा (राजा) for राज्ञा वोद्धव्य for योद्धव्य मानम् for धमम् ईप्सता (इच्छया, इच्छता, ईप्सिता, लिप्सुना, लिप्सुता) for ईप्सता

28 न त्यागेन for न त्यागो न यज्ञो (योगी, यागा) for याच्ञा तापसा (तपो वा तथैव) for न तपो

29 अधीयेत for ० यीत

30 कार्यस्तु (कायस्य, कृत्य स्यान्, कार स्यान्) for काय स्यात् परिपार्जनात् (०पालयेत्, पालनात् अन्यत्र) for अन्यन्न चाकुर्याज् for वा कुर्याद् जैत्रो (देवो, मैत्रो, इद्रो) for ऐन्द्रो ,

31 पादापकृष्टो (पादोनकृष्टो, पादेन कृष्टो, पादेन इष्टो) for पादाव० तदा for तथा

32 प्रजा पालयते यो हि धर्मेण मनुजाधिप ।
तस्य धर्मार्जिता लोका प्रजापालनसंचिता ।।
अनु १२८।४८ ।।

33 प्रत्यक्षसुखभूयिष्ठमात्मसाक्षिकमच्छलम् ।
सर्वलोकहित धर्म क्षत्रियेषु प्रतिष्ठितम् ।। शान्ति ६४।५ ।।

34 बहुश्रुत्या गुरुशुश्रूषया वा
परस्य वा संहननाद्वदन्ति ।
नित्य धर्म क्षत्रियो ब्रह्मचारी
चरेदेको ह्याश्रम धर्मकाम ।। शान्ति ६५।४ ।।

35 ब्राह्मणाना क्षतत्राणात्तत क्षत्रिय उच्यते ।। शान्ति ५९।१२८ ।।

36 भैक्षचर्या न विहिता न च विट्शूद्रजीविका ।
क्षत्रियस्य विशेषेण धर्मस्तु बलमौरसम् ।। आरण्यक ३४।५० ।।

37 महाश्रय बहुकल्याणरूप क्षात्र धर्म नेतर प्राहुरार्या ।।
शान्ति ६३।२६ ।।

32 मनुजेश्वर for मनुजाधिप,

33 प्रत्यक्ष for प्रत्यक्ष अज्ञ (फल) for सुख धर्म्य (रम्य, क्षात्र सर्व , धर्म) for धर्म

34 बाहुश्रुत्या (बाहुश्रुतत्वात्, बाहुश्रुत्य) for बहुश्रुत्या गुरुश्च for गुरु शुश्रूषणा (० ण) for ०षया, [ए] व for वा परस्य च (परस्परा , ० र) for परस्य वा वहमाना for संहननाद् नित्यो (नित्य) for नित्य वर्ण (धम) for धम धर्मचारी (ब्राह्म०) for ब्रह्म० सर्वकाम for धर्म०

35 क्षतत्राणा (० णास्, क्षताक्षत्त, क्षत्रियाणा) for क्षतत्राणात् तेन (त्राणात्) for तत क्षत्रियस्तेन उच्यते (क्षत्रियस्तु ततोच्यते) for तत ०

36 परम् for बलम्

37 महाश्रम (सहाश्रय) for महा० कल्पानुरूप for कल्याण०, क्षत्र (आहुर्) for प्राहुर् आदया for आर्या

38 यज्ञो विद्या समुत्थानमसतोष श्रिय प्रति ।
दण्डधारणमत्युग्र प्रजाना परिपालनम् ।। शान्ति २३।१० ।।

39 ये च क्रतुभिरीजाना श्रुतवन्तश्च भूमिपा ।
य एवाहवजेतारस्त एषा लोकजित्तमा ।। शान्ति ६०।१५ ।।

40 यो ब्राह्मणस्य साहाय्य कुर्यादर्थेषु कर्हिचित् ।
क्षत्रिय स शुभान् लोकान् प्राप्नुयादिति मे श्रुतम् ।।
आदि १५०।२१ ।।

41 वध हि क्षत्रबन्धना धर्ममाहू प्रधानत ।
नास्य कृत्यतम किचिदन्यद् दस्युनिबर्हणात् ।।
शान्ति ६०।१७ ।।

42 वेदज्ञान तथा कृत्स्न तप सुचरित तथा ।
द्रविणोपार्जन भूरि पात्रेषु प्रतिपादनम् ।। शान्ति २३।११ ।।

43. वेदानधीत्य धर्मेण राजशास्त्राणि चानघ ।
सतानादीनि कर्माणि कृत्वा सोम निषेव्य च ।।
शान्ति ६३।१६ ।।

38 ध्यान (यज्ञ) for यज्ञो यज्ञो विज्ञानमुत्थानम् for यज्ञो नम् उग्रत्व for अत्युग्र पालन पर for परिपालनम्

39 तु for च पार्थिवा for भूमिपा ये च (त एव) for य एव, [आ] य for [आ] इव येषा (एते) for एषा, लोकवित्तमाः (योगवित्तमा, स्वर्गजित्तमा) for लोक

40 केषुचित् for कहि

41 एव for बध मार्गम् for धर्मम् पुराविद for प्रधानत कृत्ययत for ० तम राज्ञो for अन्यद् निवारणात् for निवर्हणात्

42 यथा (महत्) for तथा द्रविणोपार्जन (द्रविण चार्जित ०णस्यार्जन, ०ण स्वाजित) for द्रविणो०

43 अवेत्य for अधीत्य विप्रेण for धर्मेण धर्माणि for शास्त्राणि चैव हि (चैव तु) for चानघ, कार्याणि for कर्माणि

44 वैश्यस्यैव तु साहाय्य कुर्वाण क्षत्रियो युधि ।
स सर्वेष्वपि लोकेषु प्रजा रञ्जयते ध्रुवम् ।।
आदि १५०।२३ ।।

45 शौर्यं तेजो धृतिर्दाक्ष्य युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम् ।। भीष्म ४०।४३ ।।

46 समयत्यागिनो लुब्धान् गुरूनपि च केशव ।
निन्दन्ति समरे पापान् क्षत्रियो य स धर्मवित् ।।
शान्ति ५५।१६ ।।

47 सर्वधर्मपर क्षत्र लोकज्येष्ठ सनातनम् ।
शश्वदक्षरपर्यन्तमक्षर सर्वतोमुखम् ।। शान्ति ६४।२९ ।।

45 क्षात्र कम for क्षत्रकर्म भुवि for युधि काले० for लोके०

46 समर- (समनु-, स्वधर्म-) for समय विप्रान् for लुब्धान्, न हृति for निहन्ति क्षत्रियान् for ०यो स च (स ह, य स्व-) for य स

47 सर्वधर्मात् for ०धर्म- -वर for पर क्षात्र for क्षत्र लोकश्रेष्ठ for ०ज्येष्ठ विदुरक्षर for शश्वद०

IV. वर्णविवेके

वैश्यवर्णः वैश्यधर्माश्च ।

1 एकैव हि भवेद् भार्या वैश्यस्य कुरुनन्दन ।
द्वितीया वा भवेच्छूद्रा न तु दष्टान्तत स्मृता ॥
अनु ४७।५१ ॥

2 कृतकृत्यो वयोऽतीतो राज्ञ कृतपरिश्रम ।
वैश्यो गच्छेदनुज्ञातो नृपेणाश्रममण्डलम् ॥ शान्ति ६३।१५ ॥

3 कृषिगोरक्ष्यवाणिज्य वैश्यकर्म स्वभावजम् ॥ भीष्म ४०।४८ ॥

4 कृषिगोरक्ष्यवाणिज्य यो विशत्यनिश शुचि ।
वेदाध्ययनसपन्न स वैश्य इति सज्ञित ॥ शान्ति १८२।६ ॥

5 गोब्राह्मणहितार्थञ्च वर्णाना सकरेषु च ।
गृह्णीयात्तु धनुर्वैश्य परित्राणाय चात्मन ॥
शान्ति १५६।३१ ॥

1 कार्या for भार्या या for वा क्वचित् for स्मृता न तु दृष्टा न तु स्मृता for न तु स्मृता

2 कृतकृत्ये for कृत० भयातीतो for वयोतीती राज्ञा for राज्ञ -परिग्रह for ०श्रम सश्रय for -मण्डलम्

3 वैश्यकर्म for शूद्रस्यापि

4 -गोरक्ष- for गोरक्ष्य-

5 तद्धनुर् for तुध०

6 तिलान् गन्धान् रसाश्चैव न विक्रीणीते वै क्वचित् ।
वणिक्पथमुपासीनो वैश्य सत्पथमाश्रित ।। अनु १२८।५५ ।।

7 दानमध्ययन यज्ञ शौचेन धनसचय ।। शान्ति ६०।२१ ।।

8 दानातिथ्यक्रियाधर्मैर्यान्ति वैश्याश्च सद्गतिम् ।।
आरण्यक १४९।५१ ।।

9 द्वे चापि भार्ये वैश्यस्य द्वयोरात्मास्य जायते ।।
।। अनु ४८।८ ।।

10 न च वैश्यस्य काम स्यान्न रक्षेय पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्या कथचन ।। शान्ति ६०।२६ ।।

11 पितृवत् पालयेद् वैश्यो युक्त सर्वपशूनिह ।
विकर्म तद् भवेदन्यत् कर्म यद्यत् समाचरेत् ।
रक्षया स हि तेषा वै महत् सुखमवाप्नुयात् ।।
शान्ति ६०।२२ ।।

12 वाणिज्य सत्पथस्थानमातिथ्य प्रथमो दम ।
विप्राणा स्वागत त्यागो वैश्यधर्म सनातन ।। अनु १२८।५४ ।।

6 काहिचित् for वै क्वचित् आवसन् for आश्रित

7 सश्रिय for -सचय

8 दानतीर्थ (दानादिभि, नानादिग्भ्य) for दानातिथ्य याति for यान्ति वैश्यापि (वैद्यास्तु, वैश्योपि, वैश्या हि) for वैश्याश्च

9 भार्या for चापि

10 नेच्छति for चे० वैश्ये न चेति for वैश्ये चे०

11 पालनाद् for येद् मुक्त for युक्त सर्वान् for सर्व- इव for इह वर्जयेद् for न भवेद् समुपा० for यत्समा०

12 वैश्यकर्म सनातनम् for वैश्य तन

13 वैश्योऽधीत्य ब्राह्मणान् क्षत्रियाश्च धनै
काले सविभज्याश्रिताश्च ।
त्रेतापूत धूममाघ्राय पुण्य प्रेत्य स्वर्गे
देवसुखानि भुक्ते ।। उद्योग ४०।२५ ।।

14 वैश्यस्तु धनधान्येन त्रीन् वर्णान् विभृयादिमान् ।
शूद्रो ह्येनान् परिचरेदिति ब्रह्मानुशासनम् ।। शान्ति ७३।८ ।।

15 वैश्यस्य सतत धर्म पाशुपाल्य कृषिस्तथा ।
अग्निहोत्रपरिस्पन्दो दानाध्ययनमेव च ।। अनु १२८।५३ ।।

13 त्रेतापूर्व (त्रयीपूत) for त्रेतापूत धूप (सोय) for धूम दिव्य for देव

15 पशु for पाशु

V. वर्णविवेके

शूद्रवर्णः शूद्रधर्माश्च ।

1 अपि शूद्र तु सद्वृत्त धर्मज्ञमभिपूजयेत् ॥ अनु ४८।४७ ॥

2 एवमेव द्विजेन्द्राणा क्षत्रियाणा विशामपि ।
शूद्राश्चतूर्णा वर्णाना नानाकर्मस्ववस्थिता ॥ शान्ति ९२।३ ॥

3 कर्मभि शुचिभिर्देवि शुद्धात्मा विजितेन्द्रिय ।
